# shrIviShNukavachastotram

# શ્રીવિષ્ણુકવચસ્તોત્રમ્

## Document Information

Text title : viShNukavachastotram

File name : viShNukavachastotram.itx

Category : kavacha, vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : May 5, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# શ્રીવિષ્ણુકવચસ્તોત્રમ્

હરિશ્ચન્દ્રઃ -
બ્રહ્મન્ શ્રીવિષ્ણુકવચં કીદૃશં કિં પ્રપાલકમ્ ।
કેનોક્તં ક ઋષિશ્છન્દઃ દૈવતં કીદૃશં મુને ॥

અગસ્ત્યઃ -
હરિશ્ચન્દ્ર પ્રવક્ષ્યામિ શ‌ૃણુષ્વાવહિતોઽધુના ।
શ્રીવિષ્ણુકવચં દિવ્યં રહસ્યં સર્વગોપિતમ્ ॥

સૃષ્ટ્યાદૌ કમલસ્થાય બ્રહ્મણે હરિણોદિતમ્ ।
કારુણ્યેન મમ પ્રોક્તં બ્રહ્મણો ક્ષીરસાગરે ॥

ગોપનીયં પ્રયત્નેન ભવતા ચ જયપ્રદમ્ ॥

અસ્ય શ્રીવિષ્ણુકવચસ્તોત્રમહામન્ત્રસ્ય -
બ્રહ્મા ઋષિઃ - અનુષ્ટુપ્ છન્દઃ, શ્રીમન્નારાયણો દેવતા,
શ્રીમન્નારાયણપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ૐ કેશવાય અઙ્ગુષ્ટાભ્યાં નમઃ ।
ૐ નારાયણાય તર્જનીભ્યાં નમઃ ।
ૐ માધવાય મધ્યમાભ્યાં નમઃ ।
ૐ ગોવિન્દાય અનામિકાભ્યાં નમઃ ।
ૐ વિષ્ણવે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ મધુસૂદનાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ૐ ત્રિવિક્રમાય હૃદયાય નમઃ ।
ૐ વામનાય શિરસે સ્વાહા ।
ૐ શ્રીધરાય શિખાયૈ વષટ્ ।
ૐ હૃષીકેશાય કવચાય હું ।
ૐ પદ્મનાભાય નેત્રાભ્યાં વૌષટ્ ।
ૐ દામોદરાય અસ્ત્રાય ફટ્ ।

ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ ।

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં,
વિશ્વાકારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિહૃદ્ધ્યાનગમ્યં,
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥

મેઘશ્યામં પીતકૌશેયવાસં શ્રીવત્સાઙ્ગં કૌસ્તુભોદ્ભાસિતાઙ્ગમ્ ।
પુણ્યોપેતં પુણ્ડરીકાયતાક્ષં, વિષ્ણું વન્દે સર્વલોકૈકનાથમ્ ॥

સશઙ્ખચક્રં સકિરીટકુણ્ડલં સપીતવસ્ત્રં સરસીરુહેક્ષણમ્ ।
સહારવક્ષસ્થલશોભિકૌસ્તુભં, નમામિવિષ્ણું શિરસાચતુર્ભુજમ્ ॥

ૐ પૂર્વતો માં હરિઃ પાતુ પશ્ચાત્ શ્રીઃ સદક્ષિણે ।
શ્રીકૃષ્ણ ઉત્તરે પાતુ શ્રી ગો વિષ્ણુશ્ચ સર્વશઃ ॥

ઊર્ધ્વં મે નન્દની પાતુ અધસ્તાત્ શાર્ઙ્ગભૃત્ સદા ।
પાદૌ પાતુ સરોજાઙ્ગી અઙ્ગે પાતુ જનાર્દનઃ ॥

જાનુની મે જગન્નાથઃ ઊરૂ પાતુ ત્રિવિક્રમઃ ।
ગુહ્યં પાતુ હૃષીકેશઃ પૃષ્ઠં પાતુ મમાવ્યયઃ ॥

પાતુ નાભિં મમાનન્તઃ કુક્ષિં રાક્ષસમર્દનઃ ।
દામોદરો મે હૃદયં વક્ષઃ પાતુ નૃકેસરી ॥

કરૌ મે કાલિયારાતિઃ ભુજૌ ભક્તાર્તિભઞ્જનઃ ।
કણ્ઠં કાલામ્બુદશ્યામઃ સ્કન્ધૌ મે કંસમર્દનઃ ॥

નારાયણો મેઽવ્યાન્નાસાં કર્ણૌ મે ચ પ્રભઞ્જનઃ ।
કપાલં પાતુ વૈકુણ્ઠઃ જિહ્વાં પાતુ દયાનિધિઃ ॥

આસ્યં દશાસ્યહન્તાવ્યાત્ નેત્રે મે પદ્મલોચનઃ ।
ભ્રુવૌ મે પાતુ ભૂમા ચ લલાટં મે સદાચ્યુતઃ ॥

મુખં મે પાતુ ગોવિન્દઃ શિખાં ગરુડવાહનઃ ।
માં શેષશાયી સર્વેભ્યો વ્યાધિભ્યો ભક્તવત્સલઃ ॥

પિશાચાગ્નિજ્વરેભ્યો માં આપદ્ભ્યોઽવતુ માધવઃ ।
સર્વેભ્યો દુરિતેભ્યશ્ચ પાતુ માં પુરુષોત્તમઃ ॥

ઇદં શ્રીવિષ્ણુકવચં સર્વમઙ્ગલદાયકમ્ ।
સર્વરોગપ્રશમનં, સર્વશત્રુવિનાશનમ્ ॥

એવં જજાપ તત્કાલે સ્યાત્પરશ્વાક્ષરં પરમ્ ।
ત્રિસ્સન્ધ્યં યઃ પઠેચ્છુદ્ધઃ સર્વત્ર વિજયી ભવેત્ ॥

ઇતિ શ્રીવિષ્ણુકવચસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*shrIviShNukavachastotram*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*